## ।। यजुर्वेद पारायण पूर्तिः ।।

समुद्र उदरमन्तरिक्षं पायुर्द्यावा पृथिवी आण्डौ ग्रावा शेपस्सोमो रेतो यज्जञ्जभ्यते तद्विद्योतते यद्विधूनुते तत्स्तनयति यन्मेहति तद्वर्षति वागेवास्य वागहर्वा अश्वस्य जायमानस्य महिमा पुरस्ताज्जायते रात्रिरेनं महिमा पश्चादनुजायत एतौवै महिमानाव श्वमभि तस्संबं भूवतुर् हयो देवानवहदर्वासुरान् वाजी गन्धर्वा अश्वो मनुष्यान्त्समुद्रो वा अश्वस्य योनिस्समुद्रो बन्धुः ॥

यद्दर्शपूर्णमासौ यजते । अश्वस्यैव मेध्यस्य पदे पदे जुहोति । एतदनुकृतिह स्म वैपुरा । अश्वस्य मेध्यस्य पदे पदे जुह्वति । यो वा अश्वस्य मेध्यस्य विवर्तनं वेद । अश्वस्यैव मेध्यस्य विवर्तनि विवर्तनि जुहोति । असौ वा आदित्योऽश्वः । स आहवनीयमागच्छति । तद्विवर्तते । यदग्निहोत्रं जुहोति । अश्वस्यैव मेध्यस्य विवर्तनि विवर्तनि जुहोति । एतदनुकृतिहस्मवै पुरा । अश्वस्य मेध्यस्य विवर्तनि विवर्तनि जुह्वति ॥

यदेकादशेऽहन् प्रवृज्यते । इन्द्रो भूत्वा त्रिष्टुभमेति । यद्द्वादशेऽहन् प्रवृज्यते । सोमो भूत्वा सुत्यमेति । यत्पुरस्तादुपसदां प्रवृज्यते । तस्मादितः पराङिमॉंल्लोकाँ स्तपन्नेति । यदुपरिष्टादुपसदां प्रवृज्यते । तस्माद मुतोऽर्वाङिमॉंल्लोकाँ स्तपन्नेति । य एवँव्वेद । ऐवतपति ॥

तस्यैवात्मा पदवित्तं विदित्वा । न कर्मणा लिप्यते पापकेन । पञ्च पञ्चाशतस्त्रिवृतस्सँव्वथ्सराः । पञ्च पञ्चाशाःपञ्चदशाः । पञ्च पञ्चाशतस्सप्त दशाः । पञ्चपञ्चाशत एकविँ शाः । विश्वसृजाँ सहस्र संवथ्सरम् । एतेन वै विश्वसृज इदँव्विश्वमसृजन्त । यद्विश्वमसृजन्त । तस्माद्विश्वसृजः । विश्वमेनानुप्रजायते । ब्रह्मणस्सायुज्यँ सलोकताँ यन्ति । एतासामेव देवतानाँ सायुज्यम् । सार्ष्टिताँ समान लोकताँ यन्ति । य एतदुपयन्ति । ये चैनत्प्राहुः । येभ्यश्चैनत् प्राहुः । ओम् ॥

तस्यैवँव्विदुषो यज्ञस्यात्मा यजमानश्श्रद्धा पत्नी शरीरमिध्ममुरो वेदिर्लोमानि बर्हिर्वेदश्शिखाहृदयँय्यूपः काम आज्यं मन्युः पशुस्तपोऽग्निश्शमयिता दक्षिणा वाग्घोता प्राण उद्गाता चक्षुरध्वर्युर्मनो ब्रह्मा श्रोत्रमग्नीद्यावद्ध्रियते सादीक्षा यदश्नाति यत्पिबति तदस्य सोमपानँय्यद्रमते तदुपसदो यत्सञ्चरत्यु पविशत्युत्तिष्ठते च स प्रवर्ग्यो यन्मुखं तदाहवनीयो यदस्य विज्ञानं तज्जुहोति यत्सायं प्रातरत्ति तत्समिधो यत्सायं प्रातर्मध्यन्दिनञ्च तानि सवनानि ये अहोरात्रे ते दर्श पूर्णमासौ येऽर्धमासाश्च मासाश्च ते चातुर्मास्यानि य ऋतवस्ते पशुबन्धा ये सँव्वत्सराश्च परिवत्सरा श्च तेऽह र्गणास्सर्व वेदसँव्वा एतत्सत्रँयन्मरणं तदवभृथ एतद्वै जरामर्यमग्निहोत्रँ सत्रँय्य एवँव्विद्वानुदगयने प्रमीयते देवानामेव महिमानँ गत्वाऽऽदित्यस्य सायुज्यं गच्छत्यथ यो दक्षिणे प्रमीयते पितृणामेव महिमानङ्गत्वा चन्द्रमसस्सायुज्यं गच्छत्येतौ वै सूर्या चन्द्रमसोर्महिमानौ ब्राह्मणो विद्वानभिजयाति तस्माद् ब्रह्मणो महिमा नमाप्नोति तस्माद् ब्रह्मणो महिमानमित्युपनिषत्
॥

यस्य स्मृत्या च नामोक्त्या तपो यज्ञ क्रियादिषु । न्यूनं संपूर्णतां यातु सद्यो वन्दे तमच्युतम् । इति विद्यातपो योनिः अयोनिर्विष्णुरव्ययः । वाग्यज्ञेनार्थितो देवः प्रीयतां मे जनार्दनः । श्रीजनार्दनः प्रीयताम् । वेदाक्षराणि यावन्ति पठितानि द्विजातिभिः । तावन्ति हरिनामानि कीर्तितानि न संशयः । वेदमेव जपेन्नित्यं यथाकालमतन्द्रितः । नह्यस्याहुः परं धर्म उपधर्मोऽन्य उच्यते । प्रायश्चित्तान्यशेषाणि तपः कर्मात्मकानि वै। यानि तेषामशेषाणां कृष्णानुस्मरणं परम् । स्वर मात्रा विहीनन्तु पदाक्षर विवर्जितः । न्यूनातिरिक्तं यत्किञ्चित् आभिर्गीर्भिरुदीरयेत् ॥